ओ३म्



सन्दीप कुमार

## निर्वचन-सिद्धान्ताः

यास्केन प्रणीते निरुक्ते द्वितीयाध्याये प्रथमपादे अस्ति । निर्वचन सिद्धान्ताः ।

निर्वचनम् → निष्कृष्य - विगृह्य - वचनं - निर्वचनम् । - दुर्गाचार्यः

यास्कः निर्वचनस्य त्रिप्रकारान् कथयति —

तत्र प्रथमः → "तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्याताम् तथा तानि निर्ब्रूयात् ।"

एवं अनेन प्रकारेण येषु तिङन्तसुबन्तपदेषु उदात्तादि स्वराः प्रकृतिप्रत्ययलोपागमादि संस्काराः समर्थाः भवन्ति । तानि च व्याकरण-प्रक्रियया अन्वितानि भवन्ति, तेन प्रकारेण तानि पदानि निर्वक्तव्यानि । ~~तेन प्रकारेण~~ एषम : प्रथमः प्रकारः निर्वचनस्य सर्वमान्यः सर्वश्रेष्ठश्च ।

२) द्वितीयः प्रकारः → यदा प्रथम प्रकारस्य स्थितिः न भवति । तदा किं करणीयमित्यनुयुङ्क्ते —

"अथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत - केनचित् वृत्तिसामान्येन ।" इति स्थौलाष्ठीविः

अनन्विते स्वरसंस्काराद्ययुक्तेऽर्थे अप्रादेशिके असमर्थे - व्याकरणप्रक्रियायाननुगते अर्थनित्यः, अर्थप्राधान्येन ~~स~~ स्वरसंस्कारावनादृत्य परीक्षेत । केनचिद् वृत्ति सामान्येन - क्रियागुणसामान्येन इत्यर्थः ।

नैरुक्तानां प्रधानलक्ष्यम् अर्थः अस्ति । अर्थप्रामुख्येनैव निर्वचनं कर्तव्यमिति प्रमुखः सिद्धान्तः । अतः एव द्वितीये प्रकारे उक्तं, यत् यत्र स्वरसंस्कारौ असमर्थौ विकारोऽप्यप्रादेशिकः, तत्र अर्थनित्येनार्थप्रामुख्येनैव निर्ब्रूयात्, निर्वचनं करणीयमिति च ।

) ~~तृतीयोऽस्यां स्पर्शः~~

तृतीयः प्रकारः → यदि द्वितीया स्थितिरपि न भवति चेत्

किं करणीयमित्यपेक्षायाम् —

"अविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयात् । न त्वेव न निर्ब्रूयात् । न संस्कारमाद्रियेत । विशयवत्यो हि वृत्तयो भवन्ति । यथार्थं विभक्तीः सन्नमयेत् ।" (इति शाकपूणिः मतम्) (इति केचिद् विद्वांसः)

यत्र कुत्रापि समानता न भवति, तत्र अक्षरवर्णसामान्यात् अक्षरवर्णयोः समानतयैव निर्ब्रूयात्, निर्वचनं कुर्यात् । न त्वेवं न निर्ब्रूयात् अर्थात् एवं न भवेत् यत् असामान्य-भिया निर्वचनं न कुर्यात् । निर्वचनकरणे संस्कारो व्याकरण प्रक्रियां ~~नहि~~ न अपेक्ष्यते । यतो हि वृत्तयः क्रियागुणौ संशयास्पदौ भवतः । तस्मिन् निर्वचने विभक्तीः यथार्थं सन्नमयेत् । तस्मिन् निर्वचने विभक्तीनां परिवर्तनम् अर्थानुसारेण करणीयम् । अत्र निरुक्ते एव न व्याकरणेऽपि अर्थानुसारेण परिवर्तनं अक्षरवर्णेषु भवत्येव यथा —

☞ "प्रत्तमवत्तमिति धात्वादी एव शिष्यते ।" अत्र प्रत्तम इत्यस्मिन्

प्र + दा + क्त — ~~प्र~~ + द अचः उपसर्गात्तः

प्र + द् द् + ~~क~~त = झरो झरि सवर्णे

प्र + द् + त = खरि च

प्रत्त + सु = अम् = प्रत्तम्

अव + दो + क्त

अवत्तम्

☞ अथाप्यस्तेर्निवृत्ति-स्थानेष्वादिलोपो भवति, स्तः सन्तीति ।

अथाप्यन्तलोपो भवति - गत्वा, गतमिति ।

अथाप्युपधालोपो भवति → जग्मतुर्जग्मुरिति ।

अथाप्युपधाविकारो भवति → राजा, दण्डीति ।

अथापि वर्णलोपो भवति → तत्त्वा यामीति ।

Scanned with CamScanner

अथापि द्विवर्णलोपस्तृच इति।
अथाप्यादि विपर्ययो भवति- ज्योतिर्घनो बिन्दुर्वाट्य इति।

एवमेव निरुक्तेऽपि →

"वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्॥"

पुनः "तद् यत्र स्वरादनन्तरान्तस्थान्तर्धातु भवति तद्
द्वि-प्रकृतीनां स्थानमिति प्रदिशन्ति।"

यत्र - यस्मिन् धातौ, स्वरात् - ~~स्वर~~ अकारादिस्वरतः
अनन्तराः - अव्यवहित आदावन्ते वा अन्तःस्था! य, र, ल, व
इत्यादि अन्तस्थवर्णाः भवेयुश्चेत् तद् तत्र द्विप्रकृतीनां
द्विस्वभावानां स्थानं स्थलमिति। एकं सम्प्रसारणरूपं;
द्वितीयं असम्प्रसारणरूपं यथा → यज धातोः सम्प्रसारण
पक्षे - इष्ट्वा। असम्प्रसारण पक्षे च यष्ट्वा।
तत्र किं करणीयमिति अपेक्षायाम् —

"तत्र सिद्धायामनुपपद्यमानायामितरयोपपिपादयिषेत्।"

तत्राप्येकेऽल्पनिष्पत्तयो भवन्ति। यथैतद् - ऊतिः, मृदुः, पृथुः, पृषतः, कुणारु (मिति)
अथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते — दमुनाः, क्षेत्रसाधा इति।
अथापि नैगमेभ्यो भाषिकाः — उष्णम्, घृतमिति।
अथापि प्रकृतय एवैकेषु भाष्यन्ते, विकृतय एकेषु।
— शवतिर्गतिकर्मा कम्बोजेषु भाष्यन्ते। विकारमस्यार्येषु भाषन्ते शव इति।
एवमेकपदानि निर्ब्रूयात्।
अथ तद्धित-समासेष्वेक-पर्वसु-चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य
निर्ब्रूयात्। राज पुरुषः

~~नैकप~~ कल्याण-वर्णरूपः कल्याण वर्णस्येवास्य रूपम्। कल्याणं
कमनीयं भवति। वर्णो वृणोतेः। रूपं रोचतेः। एवं तद्धित समासान्
निर्ब्रूयात्।
नैकपदानि निर्ब्रूयात्।